M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 531

Title: Sankhya Sutras

Patra

सांख्यसूत्र by कपिलमुनि.

In complete

		Sankhya Sutras	Title
		Kapila	Author
			Editor
			Year, Vols.
			Publisher
531		Begins abruptly.	Remarks

537

दिजातीयद्वैतापत्तिश्च ॥२२॥ विरुद्धोभयरूपा चेत् ॥२३॥ न ताहृक्पदार्थाप्रतीतेः ॥२४॥ न वयं षट्प-
र्थवादिनो वैशेषिकादिवत् ॥२५॥ अनियतत्वेपि नायौक्तिकस्य संग्रहोन्यथा बालोन्मत्तादिसमत्वं ॥२६॥
नानादिविषयोपरागनिमित्तोप्यस्य ॥२७॥ न बाह्याभ्यंतरयोरुपरज्योपरंजकभावोपि देशव्यव-
धानात् ॥२८॥ स्रुघ्नस्थपाटलिपुत्रस्थयोरिव ॥२९॥ द्वयोरेकदेशलब्धोपरागान्न व्यवस्था ॥३०॥ अ-
दृष्टवशाच्चेत् ॥३१॥ न द्वयोरेककालत्वाभावात् ॥३२॥ उपकार्योपकारकाभावः ॥३३॥ पुत्रकर्मवदिति चेद् ॥३३॥
नास्ति हि तत्र स्थिर एक आत्मायो गर्भाधानादिनादिना संस्क्रियते ॥३४॥ स्थिरकार्यासिद्धेः क्षणि-
या क्वं ॥३५॥ न प्रत्यभिज्ञाबाधात् ॥३६॥ श्रुतिन्यायविरोधाश्च ॥३७॥ दृष्टांतासिद्धेश्च ॥३८॥ युगप-
ज्जायमानयोर्न कार्यकारणभावः ॥३९॥ पूर्वापाये उत्तरायोगात् ॥४०॥ तदभावे तदयोगादुभयव्य-
भिचारादपि न ॥४१॥ पूर्वभावमात्रे न नियमः ॥४२॥ न विज्ञानमात्रं बाह्यप्रतीतेः ॥४३॥ तदभावे तद्

सांख्यसूत्रं भावोप्यन्यं तर्हि ॥४४॥ शून्यं तत्त्वं भावो विनश्यति वस्तुधर्मत्वाद्विनाशस्य ॥४५॥ अपवादमात्र
उभयपक्षसमानक्षेमत्वादयमपि ॥४७॥ अपुरुषार्थत्वमुभयथा ॥४८॥ न गतिविशेषात् ॥४
यस्य तदसंभवात् ॥५०॥ मूर्त्तत्वाद्घटादिवत्समानधर्मापत्तावपसिद्धांतः ॥५१॥ गतिश्रुतिरप्युपाधि
५ दाकाशवत् ॥५२॥ न कर्मणाप्यतद्धर्मत्वात् ॥५३॥ निर्गुणादिश्रुतिविरोधश्चेति ॥५४॥ अतिप्रसक्तिर २
न्यधर्मत्वे ॥५५॥ तद्योगोप्यविवेकान्न समानत्वं ॥५६॥ नियतकारणात्तदुच्छित्तिर्ध्वांतवत् ॥५७॥ प्रधानावि
वेकादन्याविवेकस्य तद्धाने हानं ॥५८॥ वाग्मात्रं तु न तु तत्त्वं चित्तस्थितेः ॥५९॥ युक्तितोपि न बाध्यते दि
ङ्मूढवदपरोक्षादृते ॥६०॥ अचाक्षुषाणामनुमानेन बोधो धूमादिभिरिव वह्नेः ॥६१॥ सत्वरजस्तमसां
साम्यावस्था प्रकृतिः प्रकृतेर्महान्महतोहंकारोहंकारात्पंचतन्मात्राण्युभयमिंद्रियं तन्मात्रेभ्यः स्थू
लभूतानि पुरुष इति पंचविंशतिर्गणः ॥६२॥ स्थूलात्पंचतन्मात्रस्य ॥६३॥ बाह्याभ्यंतराभ्यां तैश्चाहं

कारस्य ॥६४॥ तेनांतःकरणस्य ॥६५॥ ततः प्रकृतेः ॥६६॥ संहतपरार्थत्वात्पुरुषस्य ॥६७॥ मूले मूलाभावादमू
लं मूलं ॥६८॥ पारंपर्येप्येकत्र परिनिष्ठेति संज्ञामात्रं ॥६९॥ समानः प्रकृतेर्द्वयोः ॥७०॥ अधिकारित्रैवि
ध्यान्न नियमः ॥७१॥ महदाख्यमाद्यं कार्यं तन्मनः ॥७२॥ चरमोहंकारः ॥७३॥ तत्कार्यत्वमुत्तरेषां ॥७४॥ आ
द्यहेतुता तद्द्वारा पारंपर्येप्यणुवत् ॥७५॥ पूर्वभावित्वे द्वयोरेकतरहाने नान्यतरयोगः ॥७६॥ परिच्छि
न्नं न सर्वोपादानं ॥७७॥ तदुत्पत्तिश्रुतेश्च ॥७८॥ नावस्तुनो वस्तुसिद्धिः ॥७९॥ अबाधाददुष्टकारणजन्य
त्वाच्च नावस्तुत्वं ॥८०॥ भावे तद्योगेन तत्सिद्धिरभावे तदभावात्कुतस्तरां तत्सिद्धिः ॥८१॥ न कर्मण उपा
दानत्वायोगात् ॥८२॥ नानानुश्रविकादपि तत्सिद्धिः साध्यत्वेनावृत्तियोगादपुरुषार्थत्वं तत्र प्राप्तविवेकस्या
नावृत्तिश्रुतिः ॥८३॥ दुःखाद्दुःखं जलाभिषेकवन्न जाड्यविमोकः ॥८४॥ काम्याकाम्येपि साध्यत्वावि
शेषात् ॥८५॥ निजमुक्तस्य बंधध्वंसमात्रं परं न समानत्वं ॥८६॥ द्वयोरेकतरस्य वाप्यसन्निकृष्टार्थ

सांख्यसूत्रं परिच्छित्तिः प्रमा तत्साधकं यत्तत्त्रिविधं प्रमाणं ॥८७॥ तत्सिद्धौ सर्वसिद्धेर्नाधिक्यसिद्धिः ॥८८॥ यत्संब
द्धं सत्तदाकारोल्लेखि विज्ञानं तत्प्रत्यक्षं ॥८९॥ योगिनामबाह्यप्रत्यक्षत्वान्न दोषः ॥९०॥ लीनवस्तु
लब्धातिशयसंबंधाद्वादोषः ॥९१॥ ईश्वरासिद्धेः ॥९२॥ मुक्तबद्धयोरन्यतराभावान्न तत्सिद्धिः ॥९३॥
उभयथाप्यसत्करत्वं ॥९४॥ मुक्तात्मनः प्रशंसा उपासासिद्धस्य वा ॥९५॥ तत्संनिधानादधिष्ठातृत्वं म २
णिवत् ॥९६॥ विशेषकार्येष्वपि जीवानां सिद्धरूपबोद्धृत्वाद्वाक्यार्थोपदेशः ॥९७॥ अंतःकरणस्य तदु
ज्ज्वलितत्वाल्लोहवदधिष्ठातृत्वं ॥९८॥ प्रतिबद्धदृशः प्रतिबद्धज्ञानमनुमानं ॥९९॥ आप्तोपदेशः श
ब्दः ॥१००॥ उभयसिद्धिः प्रमाणात्तदुपदेशः ॥१॥ सामान्यतो दृष्टादुभयसिद्धिः ॥२॥ चिदवसानो भोगः ॥३॥
अकर्तुरपि फलोपभोगोऽन्नाद्यवत् ॥४॥ अविवेकाद्वा तत्सिद्धेः कर्तुः फलावगमः ॥५॥ नोभयं च तत्त्वाख्याने वि
षयोऽविषयोऽप्यतिदूरादेर्हानोपादानाभ्यामिंद्रियस्य ॥६॥ सौक्ष्म्यात्तदनुपलब्धिः कार्यदर्शनात्तदुपल

ब्धेर्वादिविप्रतिपत्तेस्तदसिद्धिरिति चेत् ॥७॥ तथाप्येकतरदृष्ट्या एकतरसिद्धेर्नापलापः ॥८॥ त्रिविधविरो
धापत्तेश्च ॥९॥ नासदुत्पादो नृशृंगवत् ॥१०॥ उपादाननियमात् ॥११॥ सर्वत्र सर्वदा संभवात् ॥१२॥ शक्तस्य
शक्यकरणात् ॥१३॥ कारणभावाच्च ॥१४॥ न भावे भावयोगश्चेत् ॥१५॥ नाभिव्यक्तिनिबंधनौ व्यवहाराव्य
वहारौ ॥१६॥ नाशः कारणलयः ॥१७॥ पारंपर्यतोऽन्वेषणा बीजांकुरवत् ॥१८॥ उत्पत्तिवद्वादोषः ॥१९॥
हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिंगं ॥२०॥ आंजस्यादभेदतो वा गुणसामान्यादेस्तत्सि
द्धिः प्रधानव्यपदेशाद्वा ॥२१॥ त्रिगुणाचेतनत्वादि द्वयोः ॥२२॥ प्रीत्यप्रीतिविषादाद्यैर्गुणानामन्योन्यं
वैधर्म्यं ॥२३॥ लघ्वादिधर्मैः साधर्म्यं च गुणानां ॥२४॥ उभयथान्यत्वात्कार्यं महदादेर्घटादिवत् ॥२५॥
परिमाणात् ॥२६॥ समन्वयात् ॥२७॥ शक्तितश्चेति ॥२८॥ तद्धाने प्रकृतिः पुरुषो वा ॥२९॥ तयोरन्यत्वे
तुच्छत्वं ॥३०॥ कार्यात्कारणानुमानं तत्साहित्यात् ॥३१॥ अव्यक्तं त्रिगुणाल्लिंगात् ॥३२॥ तत्कार्यतस्तत्सिद्धे

साख्यसूत्रं नोपलापः॥३३॥ सामान्येनविवादाभावाद्धर्मवन्नसाधनं॥३४॥ शरीरादिव्यतिरिक्तःपुमान्॥३५॥ सं
हतपरार्थत्वात्॥३६॥ त्रिगुणादिविपर्ययादधिष्ठानाच्चेति॥३७॥ भोक्तृभावात्॥३८॥ कैवल्यार्थंप्रवृ
त्तेश्च॥३९॥ जडवत्प्रकाशांशायोगात्प्रकाशः॥४०॥ निर्गुणत्वान्नचिद्धर्मा॥४१॥ श्रुत्यासिद्धस्यना ४
पलापस्तत्प्रत्यक्षबाधात्॥४२॥ सुषुप्त्याद्यसाक्षित्वं॥४३॥ जन्मादिव्यवस्थातःपुरुषबहुत्वं॥४४॥
उपाधिभेदेप्येकस्यनानायोगआकाशस्येवघटादिभिः॥४५॥ उपाधिर्भिद्यतेनतुतद्वान्॥४६॥ एक
मेकत्वेनपरिवर्तमानस्यनविरुद्धधर्माध्यासः॥४७॥ अन्यधर्मत्वेपिनारोपात्तत्सिद्धिरेकत्वात्॥४८॥ ना
द्वैतश्रुतिविरोधोजातिपरत्वात्॥४९॥ विदितबंधकारणस्यदृष्ट्यातद्रूपं॥५०॥ नांधादृष्ट्याचक्षुष्मतामनुप
लंभः॥५१॥ वामदेवादिर्मुक्तोनाद्वैतं॥५२॥ अनादावद्ययावदभावाद्भविष्यदप्येवं॥५३॥ इदानीमिवस
र्वत्रनात्यंतोच्छेदः॥५४॥ व्यावृत्तोभयरूपः॥५५॥ साक्षात्संबंधात्साक्षित्वं॥५६॥ नित्यमुक्तत्वं॥५७॥ औदासीन्यंचेति॥५८॥

न्यंचेति॥५८॥ उपरागात्कर्तृत्वंचित्सांनिध्याच्चित्सांनिध्यात्॥५९॥ ॥इतिकापिलसांख्यप्रवचनस्
त्रेविषयाध्यायःप्रथमः॥ ॥विमुक्तविमोक्षार्थंस्वार्थंवाप्रधानस्य॥१॥ विरक्तस्यतत्सिद्धेः॥२॥ नश्र
वणमात्रात्तत्सिद्धिरनादिवासनायाबलवत्त्वात्॥३॥ बहुभृत्यवद्वाप्रत्येकं॥४॥ प्रकृतिवास्तवेचपुरुषस्या
ध्याससिद्धिः॥५॥ कार्यतस्तत्सिद्धेः॥६॥ चेतनोद्देशान्नियमःकंटकमोक्षवत्॥७॥ अन्ययोगेपितत्सिद्धि
र्नांजस्येनायोदाहवत्॥८॥ रागविरागयोर्योगःसृष्टिः॥९॥ महदादिक्रमेणपंचभूतानां॥१०॥ आत्मार्थ
त्वात्सृष्टेर्नैषामात्मार्थआरंभः॥११॥ दिक्कालावाकाशादिभ्यः॥१२॥ अध्यवसायोबुद्धिः॥१३॥ तत्कार्यंध
र्मादिः॥१४॥ महदुपरागाद्विपरीतं॥१५॥ अभिमानोहंकारः॥१६॥ एकादशपंचतन्मात्रंतत्कार्यंसात्वि
कमेकादशकंप्रवर्त्तते॥१७॥ वैकृतादहंकारात्॥१८॥ कर्मेंद्रियबुद्धींद्रियैरांतरमेकादशकं॥१९॥ अ
हंकारिकत्वश्रुतेर्नभौतिकानि॥२०॥ देवतालयश्रुतिर्नारंभकस्य॥२१॥ तदुत्पत्तिश्रुतेर्विनाशदर्शनाच्च॥२२॥

सांख्यं० अतींद्रियमिंद्रियंभ्रांतानामधिष्ठाने॥२३॥शक्तिभेदेपिभेदसिद्धौनैकत्वं॥२४॥नकल्पनाविरोधःप्रमाण
दृष्टस्य॥२५॥उ,भयात्मकंमनः॥२६॥गुणपरिणामभेदान्नानात्वमवस्थावत्॥२७॥रूपादिरस
मलांतउभयोः॥२८॥द्रष्टृत्वादिरात्मनःकरणमिंद्रियाणां॥२९॥त्रयाणांस्वालक्षण्यंसामान्यका
रणवृत्तिःप्राणाद्यावायवःपंच॥३०॥क्रमशोक्रमशश्चेंद्रियवृत्तिः॥३१॥वृत्तयःपंचतय्यःक्लिष्टा ५
क्लिष्टाः॥३२॥तन्निवृत्तावुपशांतोपरागःस्वस्थः॥३३॥कुशमवन्मणिः पुरुषार्थंकरणोद्भवेप्यदृष्टोल्ला + ५
सात्॥३४॥धेनुवद्वत्साय॥३५॥करणंत्रयोदशविधमवांतरभेदात्॥३६॥इंद्रियेषुसाधकतम
त्वगुणयोगात्॥३७॥कुठारवत्॥३८॥स्मृत्यानुमानाच्च॥३९॥संभवेन्नस्वतः॥४०॥आपेक्षिकोगु
णप्रधानभावःक्रियाविशेषात्॥४१॥तत्कर्मार्जितत्वात्तदर्थमभिचेष्टालोकवत्॥४२॥समानकर्म
योगेबुद्धेःप्राधान्यंलोकवल्लोकवत्॥४३॥इतिश्रीकापिलेसांख्यप्रवचनेप्रधानकार्याध्यायोद्वि

तीयः॥ ॥अविशेषाद्विशेषारंभः॥तस्माच्छरीरस्य॥तद्बीजात्संसृतिः॥अविवेकाच्चप्रवर्तनम
विशेषाणां॥उपभोगादितरस्य॥संप्रतिपरिष्वक्तोद्वाभ्यां॥मातापितृजंस्थूलंप्रायशइतरन्नत
था।पूर्वोत्पत्तेस्तत्कार्यत्वंभोगादेकस्यनेतरस्य।सप्तदशैकंलिंगं।व्यक्तिभेदःकर्मविशेषात्॥त
दधिष्ठानाश्रयेदेहेतद्वादात्तद्वादः।नस्वातंत्र्यात्तदृतेछायावच्चित्रवच्च।मूर्तत्वेपिनसंघातयो
गात्तरणिवत्।अणुपरिमाणंतत्कृतिश्रुतेः।तदन्नमयत्वश्रुतेश्च।पुरुषार्थंसंसृतिर्लिंगानां
सूपकारवद्राज्ञः।पांचभौतिकोदेहः।चातुर्भौतिकमित्येके।एकभौतिकमित्यपरे।नसांसिद्धि
कंचैतन्यंप्रत्येकादृष्टेः।प्रपंचमरणाद्यभावश्च।मदशक्तिवच्चेत्प्रत्येकपरिदृष्टेसांहत्येतदुद्भ
वः।ज्ञानान्मुक्तिः।बंधोविपर्ययात्।नियतकारणत्वान्नसमुच्चयविकल्पौ।स्वप्नजागराभ्यामिव
मायिकामायिकाभ्यांनोभयोर्मुक्तिःपुरुषस्य॥इतरस्यापिनात्यंतिकं।संकल्पितेप्येवं।भावनोप

सांख्यसूत्रं चयाद्घटस्य सर्वं प्रकृतिवत् ॥ रागोपहतिर्ध्यानं । वृत्तिनिरोधात्तत्सिद्धिः । धारणासनस्वकर्मणा तत्सिद्धिः ॥
निरोधश्छर्दिविधारणाभ्यां । स्थिरसुखमासनं । स्वकर्म स्वाश्रमविहितकर्मानुष्ठानं । वैराग्यादभ्यासा
च्च ॥ विपर्ययभेदाः पंच । अशक्तिरष्टाविंशतिधा । तुष्टिर्नवधा ॥ सिद्धिरष्टधा । अवांतरभेदाः पूर्वव
त् । एवमितरवादिप्रभेदाः । आब्रह्मस्तंबपर्यंतं तत्कृते सृष्टिराविवेकात् । ऊर्ध्वं सत्त्वविशाला । तमोवि ८
शाला मूलतः । मध्ये रजोविशाला । कर्मवैचित्र्यात्प्रधानचेष्टा गर्भदासवत् । आवृत्तिस्तत्राप्युत्तरोत्त
रयोनियोगाद्धेयः । समानं जरामरणादिजं दुःखं । न कारणलयात्कृतकृत्यता मग्नवदुत्थानात् । अकार्य
त्वेपि तद्योगः पारवश्यात् । स हि सर्ववित्सर्वस्य कर्ता । ईदृशेश्वरसिद्धिः सिद्धा । प्रधानसृष्टिः
परार्थं स्वतोप्यभोक्तृत्वादुष्ट्रकुंकुमवहनवत् । अचेतनत्वेपि क्षीरवच्चेष्टितं प्रधानस्य । कर्तृकर्म
वद्दृष्टेर्वा कालादेः । स्वभावाच्चेष्टितमनभिसंधानाद्भृत्यवत् ॥ कर्माकृष्टेर्वानादितः । विविक्तबोधात्सृष्टिनिवृत्तिः ॥

निवृत्तिः प्रधानस्य सूदवत्पाके । इतर इतरवत्तद्दोषात् ॥ द्वयोरेकतरस्य वौदासीन्यमपवर्गः । अन्यसृष्ट्यु
परागेपि न विरज्यते ऽप्रबुद्धरज्जुतत्त्वस्येवोरगः । कर्मनिमित्तयोगाच्च ॥ नैरपेक्ष्येपि प्रकृत्युपकारे ऽवि
वेको निमित्तं । नर्तकीवत्प्रवृत्तस्यापि निवृत्तिश्चारितार्थ्यात् ॥ दोषबोधेपि नोपसर्पणं प्रधानस्य कुलव
धूवत् । नैकांततो बंधमोक्षौ पुरुषस्याविवेकादृते । प्रकृतेरांजस्यात्ससंगत्वात्पशुवत् । रूपैः सप्तभिरात्मा
नं बध्नाति प्रधानं कोशकारवद्विमोचयत्येकरूपेण । निमित्तत्वमविवेकस्य न दृष्टहानिः । तत्त्वाभ्यासा
न्नेति नेतीति त्यागाद्विवेकसिद्धिः । अधिकारिप्रभेदान्न नियमः । बाधितानुवृत्त्या मध्यविवेकतोप्युपभोगः ।
जीवन्मुक्तश्च । उपदेश्योपदेष्टृत्वात्तत्सिद्धिः । श्रुतिश्च ॥ इतरथांधपरंपरा । चक्रभ्रमणवद्धृतशरीरः । सं
स्कारलेशतस्तत्सिद्धिः ॥ विवेकान्निःशेषदुःखनिवृत्तौ कृतकृत्यता नेतरान्नेतरात् ॥ ॥ इति कापिले सांख्यप्रव
चने वैराग्याध्यायस्तृतीयः ॥ ॥ राजपुत्रवत्तत्त्वोपदेशात् । पिशाचवदन्यार्थोपदेशेपि । आवृत्तिरसकृ

सांख्यं

दुपदेशात् । पितापुत्रवदुभयोर्दृष्टत्वात् । श्येनवत्सुखदुःखी त्यागवियोगाभ्यां ॥ अहिनिर्ल्वयिनीवत् । छि
न्नहस्तवद्वा ॥ असाधनानुचिंतनं बंधाय भरतवत् ॥ बहुभिर्योगे विरोधो रागादिभिः कुमारीशंखवत् ॥
द्वाभ्यामपि तथैव । निराशः सुखी पिंगलावत् । अनारंभेपि परगृहे सुखी सर्पवत् । बहुशास्त्रगुरूपा
सनेपि सारादानं षट्पदवत् ॥ इषुकारवन्नैकचित्तस्य समाधिहानिः । कृतनियमलंघनादानर्थक्य ७
लोकवत् ॥ तद्विस्मरणेपि भेकीवत् ॥ नोपदेशश्रवणेपि कृतकृत्यता परामर्शादृते विरोचनवत् ॥ दृष्टस्तयोरिं
द्रस्य । प्रणतिब्रह्मचर्योपसर्पणानि कृत्वा सिद्धिर्बहुकालात्तद्वत् । न कालनियमो वामदेववत् ॥ अध्यस्तरू
पोपासनात्पारंपर्येण यज्ञोपासकानामिव । इतरलाभेप्यावृत्तिः पंचाग्नियोगतो जन्मश्रुतेः ॥ विरक्त
स्य हेयहानमुपादेयोपादानं हंसक्षीरवत् । लब्धातिशययोगाद्वा तद्वत् । न कामचारित्वं रागोपहते
शुकवत् ॥ गुणयोगाद्बद्धः शुकवत् ॥ न भोगाद्रागशांतिर्मुनिवत् ॥ दोषदर्शनादुभयोः ॥ न मलिनचेत

स्युपदेशबीजप्ररोहोऽजवत् । नाभासमात्रमपि मलिनदर्पणवत् । न तज्जस्यापि तद्रूपता पंकजव
त् । न भूतियोगेपि कृतकृत्यतोपास्यसिद्धिवदुपास्यसिद्धिवत् ॥ ॥ कापिले सांख्यप्रवचने आ
ख्यायिकाध्यायश्चतुर्थः ॥ ॥ मंगलाचरणं शिष्टाचारात्फलदर्शनाच्छ्रुतितश्चेति । नेश्वरा
धिष्ठिते फलसंपत्तिः प्रतिनियतकारणत्वात् । तद्योगेपि न नित्यमुक्तः ॥ प्रधानशक्तियोगाच्चेत्संयो
गापत्तिः ॥ सत्तामात्राच्चेत्सर्वैश्वर्यं । प्रमाणाभावान्न तत्सिद्धिः । संबंधाभावान्नानुमानं । श्रुतिरपि प्रधा
नकार्यत्वस्य ॥ नाविद्याशक्तियोगो निःसंगस्य । तद्योगे तत्सिद्धावन्योन्याश्रयत्वं । न बीजांकुरवत्सं
सारश्रुतेः । विद्यातोन्यत्वे ब्रह्मबाधप्रसक्तेः ॥ अबाधे नैष्फल्यं । विद्याबाध्यत्वे जगतोप्येवं । तद्रूपत्वे
सादित्वं । न धर्मापलापः प्रकृतिकार्यवैचित्र्यात् । श्रुतिलिंगादिभिस्तत्सिद्धिः ॥ न नियमः प्रमाणांतराव
काशात् । उभयत्राप्येवं । अर्थात्सिद्धिश्चेत्समानमुभयोः । अंतःकरणधर्मत्वं धर्मादीनां । गुणादीनां च नां

कापिलसू त्यबाधः।पंचावयवयोगात्सुखसंपत्तिः।नसकृद्ग्रहणात्संबंधसिद्धिः।नियतधर्मसाहित्यमुभयोरेकत
रस्यवाव्याप्तिः।नतत्त्वांतरंवस्तुकल्पनाप्रसक्तेः।निजशक्त्युद्भवमित्याचार्याः।आधेयशक्तियोगादिति
पंचशिखः।नस्वरूपशक्तिर्नियमः।पुनर्वादप्रसक्तेः।विशेषणानर्थक्यप्रसक्तेः।पल्लवादिष्वनुपप
त्तेः।आधेयशक्तिसिद्धौनिजशक्तियोगःसमानन्यायात्।वाच्यवाचकभावःसंबंधःशब्दार्थयो
स्त्रिभिःसंबंधसिद्धिः।नकार्येनियमउभयथादर्शनात्।लोकेव्युत्पन्नस्यवेदार्थप्रतीतेः।नत्रिभिर ८
पौरुषेयत्वाद्वेदस्यतदर्थस्याप्यतींद्रियत्वात्।नयज्ञादेःस्वरूपतोधर्मत्वंवैशिष्ट्यात्॥निजशक्त्युत्पत्त्या
व्यवछिद्यते।योग्यायोग्येषुप्रतीतिजनकत्वात्तत्सिद्धिः।ननित्यत्वंवेदानांकार्यत्वश्रुतेः।नपौरुषेयत्वं
तत्कर्तुःपुरुषस्याभावात्।मुक्तामुक्तयोरयोग्यत्वात्।नापौरुषेयत्वान्नित्यत्वमंकुरादिवत्।तेषामपि
तद्योगेदृष्टबाधादिप्रसक्तिः।यस्मिन्नदृष्टेपिकृतबुद्धिरुपजायतेतत्पौरुषेयं।निजशक्त्यभिव्यक्तेः

सांख्यसू पितृकुक्षिक्षेत्रेरितरेतरयोगावत्।नेंद्रादिपदयोगोपितद्वत्।नभूतप्रकृतिकत्वमिंद्रियाणामाहंकारिक +
त्वश्रुतेः।नषट्पदार्थनियमस्तद्बोधान्मुक्तिः।षोडशादिष्वप्येवं।नाणुनित्यतातत्कार्यत्वश्रुतेः।न
निर्भागत्वंकार्यत्वात्।नरूपनिबंधनात्प्रत्यक्षनियमः।नपरिमाणचातुर्विध्यंद्वाभ्यांतद्योगात्।अनि
त्येपिस्थिरतायोगात्प्रत्यभिज्ञानंसामान्यस्य।नतदपलापस्तस्मात्॥नान्यनिवृत्तिरूपत्वंभाव
प्रतीतेः।नतत्त्वांतरंसादृश्यंप्रत्यक्षोपलब्धेः।निजशक्त्यभिव्यक्तेर्वावैशिष्ट्यात्तदुपलब्धेः।नसं ९
ज्ञासंज्ञिसंबंधोपि।नसंबंधनित्यताउभयानित्यत्वात्॥नातःसंबंधोधर्मिग्राहकमानबाधात्॥ बाधात्
\+ नसमवायोस्तिप्रमाणाभावात्।उभयथाप्यन्यथासिद्धेर्नप्रत्यक्षमनुमानंवा।नस्थूलमिति
तिनियमआतिवाहिकस्यापिविद्यमानत्वात्।नप्राप्तप्रकाशकत्वमिंद्रियाणामप्राप्तेःसर्वप्राप्तेर्वा।
\+ नतेजोपसर्पणात्तैजसंचक्षुर्वृत्तितस्तत्सिद्धेः।प्राप्तार्थप्रकाशलिंगाद्वृत्तिसिद्धिः।भागगुणाभ्यां

स्वतः प्रामाण्यं। नासतः ख्यानं नृशृंगवत्। न सतो बाधदर्शनात्। प्रतीत्यप्रतीतिभ्यां न स्फोटात्मकः
शब्दः। न शब्दनित्यत्वं कार्यताप्रतीतेः। पूर्वसिद्धसत्त्वस्याभिव्यक्तिर्दीपेनेव घटस्य। सत्कार्यसिद्धांतश्चेत्सि
द्धसाधनं। नाद्वैतमात्मनो लिंगात् तद्भेदप्रतीतेः। नानात्मनापि प्रत्यक्षबाधात्। नोभाभ्यां तेनैव। अन्य
परत्वमविवेकानां तत्र। नात्माविद्या नोभयं जगदुपादानकारणं निःसंगत्वात्। नैकस्यानंदचिद्रूप
त्वे द्वयोर्भेदात्। दुःखनिवृत्तेर्गौणः। विमुक्तिप्रशंसा मंदानां। न व्यापकत्वं मनसः। करणत्वादिंद्रियत्वा
द्वा। सक्रियत्वाद्गतिश्रुतेः। न निर्भागत्वं तद्योगाद्घटवत्। प्रकृतिपुरुषयोरन्यत्सर्वमनित्यं। न
भागलाभो भागिनो निर्भागत्वश्रुतेः। नानंदाभिव्यक्तिर्मुक्तिर्निर्धर्मत्वात्। न विशेषगुणोच्छित्तिस्तद्वत्॥
न विशेषगतिर्निष्क्रियस्य। नाकारोपरागोच्छित्तिः क्षणिकत्वादिदोषात्। न सर्वोच्छित्तिरपुरुषार्थत्वादिदोषात्॥
एवं शून्यमपि। संयोगाश्च वियोगांता इति न देशादिलाभोऽपि। नाभागियोगो भागस्य। नाणिमादियोगोऽप्यवश्यंभा

तत्वांतरं वृत्तिः संबंधार्थं सर्पतीति॥ न द्रव्यनियमस्तद्योगात्। न देशभेदेऽप्यन्योपादानतास्मदादिव
न्नियमः। सर्वेषु पृथिव्युपादानमसाधारण्यात्तद्व्यपदेशः पूर्ववत्। न देहारंभकस्य प्राणत्वमिंद्रियश
क्तितस्तत्सिद्धेः। भोक्तुरधिष्ठानाद्भोगायतननिर्माणमन्यथा पूतिभावप्रसंगात्। भृत्यद्वारा स्वाम्य
धिष्ठितिर्नैकांतात्। समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपता। द्वयोः सबीजमन्यत्र तद्धतिः। द्वयोरि
व त्रयस्य दृष्टत्वान्न तु द्वौ। वासनयानर्थख्यापनं दोषयोगेऽपि न निमित्तस्य प्रधानबाधकत्वं॥
एकः संस्कारः क्रियानिर्वर्तको न तु प्रतिक्रियं संस्कारभेदा बहुकल्पनाप्रसक्तेः। न बाह्यबुद्धिनि
यमो वृक्षगुल्मलतौषधिवनस्पतितृणवीरुधादीनामपि भोक्तृभोगायतनत्वं पूर्ववत्। स्मृते
श्च। न देहमात्रतः कर्माधिकारित्वं वैशिष्ट्यश्रुतेः। त्रिधा त्रयाणां व्यवस्था कर्मदेहोपभोगदेहोभ
यदेहाः। न किंचिदप्यनुशयिनः। न बुद्ध्यादिनित्यत्वमाश्रयविशेषेऽपि वह्निवत्। आश्रयासिद्धेश्च

सांख्यसू योगसिद्धयोऽप्यौषधादिसिद्धिवन्नापलपनीयाः ॥ न भूतचैतन्यं प्रत्येकादृष्टेः सांहत्येऽपि च सांहत्ये
पि च ॥ ॥इति श्रीकापिलसांख्यप्रवचने स्वपरपक्षनिर्णयाध्यायः पंचमः ॥ ॥अस्त्यात्मा ना
स्तित्वसाधनाभावात् । देहादिव्यतिरिक्तोऽसौ वैचित्र्यात् । षष्ठीव्यपदेशादपि ॥ न शिलापुत्रवद्धर्मि
ग्राहकमानबाधात् । अत्यंतदुःखनिवृत्त्या कृतकृत्यता । यथा दुःखात्क्लेशः पुरुषस्य न तथा सुखा
दभिलाषः । कुत्रापि कोऽपि सुखीति तदपि दुःखशबलमिति दुःखपक्षे निःक्षिपंते विवेचकाः । १०
सुखलाभाभावादपुरुषार्थत्वमिति चेन्न द्वैविध्यात् । निर्गुणत्वमात्मनोऽसंगत्वादिश्रुतेः । परधर्म
त्वेऽपि तत्सिद्धिरविवेकात् । अनादिरविवेकोऽन्यथा दोषद्वयप्रसक्तेः । न नित्यः स्यादात्मवत् । अन्यथानुच्छि
त्तिः । प्रतिनियतकारणनाश्यत्वमस्य ध्वांतवत् । अत्रापि प्रतिनियमोऽन्वयव्यतिरेकात् । प्रकारांतरासं
भवादविवेक एव बंधः । न मुक्तस्य पुनर्बंधयोगोऽप्यनावृत्तिश्रुतेः । अपुरुषार्थत्वमन्यथा । अविशेषा

पत्तिरुभयोः । मुक्तिरंतरायध्वस्तेर्न परः । तत्राप्यविरोधः । अधिकारित्रैविध्यान्न नियमः । दार्ढ्यार्थमुत्त
रेषां । स्थिरसुखमासनमिति न नियमः । ध्यानं निर्विषयं मनः । उभयथाप्यविशेषश्चेन्नैवमुपरागनि
रोधाद्विशेषः । निःसंगेऽप्युपरागोऽविवेकात् । जपास्फटिकयोरिव नोपरागः किंत्वभिमानः । ध्यानधा
रणाभ्यासवैराग्यादिभिस्तन्निरोधः । लयविक्षेपयोर्व्यावृत्त्येत्याचार्याः । न स्थाननियमश्चित्तप्रसादात् ।
प्रकृतेराद्योपादानताऽन्येषां कार्यत्वश्रुतेः । नित्यत्वेऽपि नात्मनो योग्यत्वाभावात् । श्रुतिविरोधान्न कु
तर्कापसदस्यात्मलाभः । पारंपर्येऽपि प्रधानानुवृत्तिरणुवत् । सर्वत्र कार्यदर्शनाद्विभुत्वं । ग
तियोगेऽप्याद्यकारणताहानिरणुवत् । प्रसिद्धाधिक्यं प्रधानस्य न नियमः । सत्त्वादीनामतद्धर्मत्वं तद्रूपत्वात् ।
अनुपभोगेऽपि पुमर्थं सृष्टिः प्रधानस्योष्ट्रकुंकुमवहनवत् । कर्मवैचित्र्यात्सृष्टिवैचित्र्यं । साम्यवैष
म्याभ्यां कार्यद्वयं । विमुक्तबोधान्न सृष्टिः प्रधानस्य लोकवत् । नान्योपसर्पणेऽपि मुक्तोपभोगो निमित्ता

ताभावात्। पुरुषबहुत्वं व्यवस्थातः। उपाधिश्चेत्तत्सिद्धौ पुनर्द्वैतं। द्वाभ्यामपि प्रमाणविरोधः। द्वा
भ्यामविरोधान्न पूर्वमुत्तरं च साधकाभावात्। प्रकाशतस्तत्सिद्धौ कर्मकर्तृविरोधः। जडव्यावृत्तो ज
डं प्रकाशयति चिद्रूपः। न श्रुतिविरोधो रागिणां वैराग्याय तत्सिद्धेः। जगत्सत्यत्वमदुष्टकारणज
न्यत्वाद्बाधकाभावात्। प्रकारान्तरासंभवात्सदुत्पत्तिः। अहंकारः कर्त्ता न पुरुषः। चिदवसाना भुक्ति
स्तत्कर्मार्जितत्वात्। चंद्रादिलोकेप्यावृत्तिर्निमित्तसद्भावात्। लोकस्य नोपदेशात्सिद्धिः पूर्ववत्।
पारंपर्येण तत्सिद्धौ विमुक्तिश्रुतिः। गतिश्रुतेश्च व्यापकत्वेप्युपाधियोगात्। भोगदेशकाललाभो
व्योमवत्। अनधिष्ठितस्य पूतिभावप्रसंगान्न तत्सिद्धिः। अदृष्टद्वारा चेत्। असंबंधस्य तदसंभवा
ज्जलादिवदंकुरे। निर्गुणत्वात्तदसंभवादहंकारधर्मा ह्येते। विशिष्टस्य जीवत्वमन्वयव्यतिरेकात्।
अहंकारकर्त्रधीना कार्यसिद्धिर्नेश्वराधीना प्रमाणाभावात्। अदृष्टोद्भूतिवत्समानत्वं महतोन्यत्॥

कर्मनिमित्तः प्रकृतेः स्वस्वामिभावोप्यनादिर्बीजांकुरवत्। अविवेकनिमित्तो वा पंचशिखः। लिं
गशरीरनिमित्तक इति सनंदनाचार्यः। यद्वा तद्वा तदुच्छित्तिः पुरुषार्थस्तदुच्छित्तिः पुरुषार्थः॥
॥ ॥इति श्रीकापिलसांख्यप्रवचनसूत्रे तंत्राध्यायः षष्ठः समाप्तः॥ ॥